योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ११

एकादशः सर्गः ११

श्रीवसिष्ठ उवाच ।

इति संचिन्त्य जनको यथाप्राप्तां क्रियामसौ ।

असक्तः कर्तुमुत्तस्थौ दिनं दिनपतिर्यथा ।। १

इष्टानिष्टाः परित्यज्य चेतसा वासनाः स्वयम् ।

यथाप्राप्तं चकारासौ जाग्रत्येव सुषुप्तवत् ।। २

संपाद्य तदहःकार्यमार्यावर्जनपूर्वकम् ।

अनयच्छर्वरीमेकस्तयैव ध्यानलीलया ।। ३

मनः समरसं कृत्वा संशान्तविषयभ्रमम् ।

शर्वर्यां क्षीयमाणायामित्थं चित्तमबोधयत् ।। ४

चित्त चञ्चल संसार आत्मनो न सुखाय ते ।

शममेहि शमाच्छान्तं सुखं सारमवाप्यते ।। ५

यथा यथा विकल्पौघान्संकल्पयसि हेलया ।

तथा तथैति स्फारत्वं संसारस्तव चिन्तया ।। ६

शतशाखत्वमायाति सेकेन विटपी यथा ।

अनन्ताधित्वमायासि शठभोगेच्छया तथा ।। ७

चिन्ताजालविलासोत्था जन्मसंसारसृष्टयः ।

तस्मात्त्यक्त्वा विचित्रां त्वं चिन्तामुपशमं व्रज ।। ८

संसारसृष्टितरलामिमां तुलय सुन्दर ।

अस्यां चेत्सारमाप्नोषि तदेतामेव संश्रय ।। ९

आस्थां यस्मात्परित्यज्य दृश्यदर्शनलालसात् ।

मैतद्गृहाण मा मुञ्च स्वेच्छया विहरेच्छया ।। १०

इदं दृश्यमसत्सद्वाप्युदेत्वस्तमुपैतु वा ।

साधो विषमतां गच्छ मैतदीयैर्गुणागुणैः ।। ११

मनागपि न संबन्धस्तव दृश्येन वस्तुना ।

अविद्यमानरूपेण संबन्धः कोऽयमीदृशः ।। १२

असत्त्वमेतच्च न सद्व्योरेवासतोः सतोः ।

संबन्ध इति चित्रेयमपूर्वैवाक्षरावली ।। १५

असदेतत्तु सच्चेत्त्वं तथापि किल सुन्दर ।

सङ्गः सदसतोः कीदृग्वद त्वं मर्त्यजीवयोः ।। १४

चित्त त्वमथ दृश्यं च द्वे एव यदि सन्मये ।

सदास्थिते तत्प्रसरः कुतो हर्षविषादयोः ।। १५

तस्मान्महाधिं मुञ्च त्वं मूकमुल्लासमाहर ।

संक्षुब्धाम्बुधिमाविष्टां त्यजाभव्यामिमां स्थितिम् ।।

कन्दुकालातवद्व्यर्थमात्मनैव परिज्वलन् ।

मा मोहमलमासाद्य मन्दतां गच्छ सन्मते ।। १७

न तदिहास्ति समुन्नतमुत्तमं

व्रजसि येन परां परिपूर्णताम् ।

तदवलम्ब्य बलादतिधीरतां

जहिहि चञ्चलतां शठ रे मनः ।। १८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषूपशमप्रकरणे चित्तानुशासनं नामैकादशः सर्गः ।। ११ ।।